IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# ।।आधुनिकयुगे अष्टाङ्गयोगेषु यमस्य स्थानम्।।

# In the modern Era the Importance of Yam, A part of Asthanga Yoga.

[1]NANDADULAL MANDAL, [2] PALASH DAS , [3]Labani Bairagya
[1]ASSISTANT PROFESOR, [2]M.A . NET in Sanskrit with JRF M.A . NET in Sanskrit with JRF , [3] M.A. NET in Sanskrit
[1]Central Sanskrit University,
[2]Visva Bharati University(Central University),
[3]Visva Bharati University(Central University)

**सारांशः**- विश्वेऽस्मिन् विश्वे योगस्य प्रचारप्रसारं बहुधा परिदृश्यन्ते। तत्र तावत् योगस्य बाह्यम् अङ्गम् आसनप्राणायामविषये अधिकतया ध्यानं प्रयच्छन्ति जनाः। किञ्च पतञ्जलिप्रणितस्य अष्टाङ्गयोगस्य प्रथमांङ्गं यमं विना केवलम् आसनेन प्राणायामेन वा योगस्य परिपूर्णतां न समधिगच्छन्ति। यदि योगद्वारा समाजकल्याणं कर्तुं इच्छन्ति तर्हि योगस्य प्रथमं अङ्गं यमम् अर्थात् अहिंसा, सत्यम्, अस्तेयं, ब्रह्मचर्यः, अपरिग्रहः पालनीयः। एतेषां विहाय योगस्तावत् फलाक्रिया अर्थात् व्यर्थः। अतः अत्र यमस्य विस्तृतं वर्णनं उपस्थापितं वर्तते।

**संकेताक्षरः**- अहिंसा (Non Violence), सत्यम् (Truth), अस्तेयम् (Non stealing), ब्रह्मचर्यः (Celibacy), अपरिग्रहः (Imperfection).

**भूमिका**- भारतीयास्तिकदर्शने योगः अर्थात् समाधिः अत्यन्तगुरुत्वपूर्णस्थानमधिक्रियते। षड् आस्तिकदर्शनेषु वेदान्तयोगदर्शने अस्मिन् विषये विस्तृतरुपेण आलोचितम्। अतः प्रश्नः जायते योगः नाम किम्? अस्मिन् प्रसङ्गे पातञ्जलयोगदर्शनयोः योगसूत्रभाष्यकारेण व्यासेन उक्तम्- "**योगः समाधिः**" अर्थात् योगस्यार्थः समाधिः। अतः प्रश्नः जायते समाधिः कः? अस्मिन् प्रसङ्गे परमहंसपरिव्राजकाचार्यः श्रीः श्रीसदानन्दयोगेन्द्रसरस्वती प्रणीतस्य 'वेदान्तसारः' इति ग्रन्थस्य टीकाकारः नृसिंहः सरस्वतीप्रणीत- सुवोधिनी टीकायामुक्तम्- **"व्युत्थाननिरोधसंस्कारयोः अभिभवप्रादुर्भावे सति चित्तस्यैकाग्रतापरिणामः समाधिः।"** अपि च रामतीर्थः विद्वन्मनोरञ्जनो टीकामुक्तम्- **"चित्तस्य ज्ञेयात्मना निस्चलावस्थानं समाधिः।"** एतत् एव योगस्य चरमावस्था। वेदान्तमते आत्मविषये चित्तस्य एकाग्रता समाधिः- **"समाधिः संविदुत्पत्तिः परजीवैकातां प्रति।"** (जावालोपनिषद् -10/1) यतः तद् ब्रह्म अहम्, अस्मिन् संसारे सद्भिन्नं किमपि नास्ति। अनेन प्रकारेण आत्मानं ब्रह्मभिन्नरुपेण ज्ञानं समाधिः -

**"सोऽयं ब्रह्म न संसारः न मत्तोऽन्यत् कदाचन।**

**इति विद्यात् स्वमात्मानं समाधिः प्रक्रीर्तितः।।"** (सूतसंहिता-2/20)

वेदान्तमते समाधेः प्रकारद्वयमस्ति सविकल्पकः निर्विकल्पकश्चेति- **"समाधिः तु द्विविधः सविकल्पकः निर्विकल्पकश्चेति।"** (वेदान्तसारः) तन्मध्ये सविकल्पकसमाधिः ज्ञातृज्ञानादि एतत् सर्वं विभागवोधः न भूत्वा अद्वितीयवस्तुनि दताकाराकारितायाः चित्तवृत्तेः अवस्थानं - **"तत्र सविकल्पकः नाम ज्ञातृज्ञानादिविकल्पलय अनपेक्षयाः अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अवस्थानम्।"** (वेदान्तसारः) निर्विकल्पसमाधिः किन्तु ज्ञातृज्ञानादिविकल्पलयो अपेक्षा भवति। चित्तवृत्तिः अद्वितीयब्रह्मवस्तुनि ब्रह्माकाराकारितायाः ब्रह्मना अतिशयः एकीभूतभुत्वा अवस्थानं करोति

**"निर्विकल्पकः तु ज्ञातृज्ञानादिविकल्पलयो अपेक्षया अद्वितीयवस्तुनि तदाकाराकारितायाः चित्तवृत्तेः अतितरां एकोभावेन अवस्थानम्।"** (वेदान्तसारः) अस्य योगस्य अङ्गानि अष्टविधानि। तानि अङ्गानि यथाक्रमेण - यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिः। तस्मात् कारणात् योगसूत्रकारेणोक्तम्- **"यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि।"** (योगसूत्रम्-2/29) अस्मिन् विषये वेदान्तसारेऽपि उक्मम्- "अस्याङ्गानि यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः।" (वेदान्तसारः) अस्मिन् प्रसङ्गे जावालदर्शनोपनिषदि उक्तम् -

**"यमश्च नियमश्चैव तथैवासनमेव च।**

**प्राणायामस्तथा ब्रह्मण्प्रत्याहारततः परम्।।**

**धारणा च तथा ध्यानं समाधिश्चाष्टमं मुने।।"** (जावालोपनिषद्- 4-5)

## अष्टाङ्गयोगेषु यमस्य परिचयः-

यमाः पञ्चविधाः अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाश्च। तस्मात् कारणात् योगसूत्रे महर्षि पतञ्जलिना उक्तम्- **"अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।"** (योगसूत्रम् - 2/30) सदानन्दयोगिन्द्रमहोदेनोक्तम् - **"तत्र अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः।"** यद्यपि योगसूत्रे महर्षि पतञ्जलिना, वेदान्तसारे सदानन्दयोगिन्द्रमहोदयेन च पञ्चविधयोगविषये उक्मम्। तथापि जाबालोपनिषदि दशविधयमविषये परिचयः प्राप्यते।

**"अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम्।**

**क्षमा धृतिर्मिताहारः शौचं चैव यमाः दशः।।"** (जावालोपनिषद्-6)

अर्थात् अहिंसा,सत्यम् अस्तेयं ब्रह्मचर्यं दया आर्जवं क्षमा धृतिः मिताहारः शौचमिति दशप्रकारं यमस्य विभाजनं कृतं वर्तते।

**अहिंसा-** अहिंसानुष्ठानः प्रथमभूत। कायिक-वाचिक-मानसिकश्च इति केनचित् उपायेन अपरस्य किञ्चित् प्रकारं दुःखं न दातव्यम् अहिंसानुष्ठाने। तस्मात् कारणात् व्यासदेवेन उक्मम्-

**"सर्वथा सर्वदा सर्वभूतानाम् अनभिद्रोहः अहिंसा।"** (व्यासभास्यम्)

एतेषु शास्त्रीयहिंसा अन्तर्भूक्तर्न भवति। फलतः श्रुत्यानुसारे पशुबधं हिंसा न वक्तुं शक्यते- "एतेन श्रौतं पश्वालम्भसं हिंसा न भवतीति अवगम्यते।" इतरजनाः श्रौतपशुवधमपि हिंसारुपेण मन्यते। मम प्राणः मां निकषा यथा प्रियः तद् रुपम् अपरस्यापि। अनेन प्रकारेण अहिंसानुष्ठानात् चित्तनिर्मलं भवति। शङ्कराचार्यः - 'यमयतीति यमः' एतत् अर्थं गृहीत्वा उक्तम् -"इदं सर्वं ब्रह्मैव" अनेन प्रकारेण विश्वासपूर्वकम् इन्द्रियस्य नियन्त्रणं यमः। सर्वं ब्रह्म अतः अहं किमर्थम् आत्मानं हननं पीडनं करोति ? एतत् विचारपूर्वकं ब्रह्मजिज्ञासुः इन्द्रियसंयमाभ्यासः क्रियते। सर्वदर्शनसंग्रहे जैनमतानुसारेण मोहवशात् चराणाम् अर्थात् मनुष्यादीनां, स्थावराणाम् अर्थात् वृक्षादीन् पादार्थान् प्राणनाशाभावम् अहिंसा व्रतमुच्यते।

**"न यत् प्रमादयोगेण जीवितव्यपरोपणम्।**

**चराणां स्थावराणां च तदहिंसाव्रतं मतम्।।"** (सर्वदशनसंग्रहः - जैनदर्शनम्)

परन्तु कायिक-मानसिकहिंसां विना वैदिकविध्यानुसारेण अथवा श्रूत्वानुसारेण यदि किमपि हिंसानुष्ठानं भवति तर्हि तत् हिंसा न गण्यते। इतोऽपि बृहत् मङ्गलार्थं क्षुद्रपापं पापरुपेण न परिगण्यते। यतः आत्मा अच्छेद्यः सर्वगतः तस्मात् कारणात् जावालोपनिषदि उच्यते-

**"वेदोक्तेन प्रकारेण विना सत्यं तपधनम्।**

**कायेन मनसा वाचा हिंसाऽहिंसा न चान्यथा।।**

**आत्मा सर्वगतोऽच्छेद्यो न ग्राह्य इति मे मतिः।**

**स चाहिसा वरा प्रोक्ता मुने वेदान्तवेदिभिः।।"** (जावालोपनिषद्.7 - 8)

सत्यादि अपरं यमनियमसर्वम् अहिंसा मूलकं -" उत्तरे च यमनियमास्तन्मूलास्तत्सिद्धिपर तथा तत् प्रतिप्रादनाय प्रतिपाद्यन्ते, तद्वतातद्रुपकरणायैवोपादीयन्ते।" (योगदर्शनम्)

**सत्यम्-** अहिंसानुष्ठानेन सह सत्यानुष्ठानं कर्तव्यम्। यथार्थम् अर्थात् तद्वती तत्प्रकारं भाषणं सत्यानुष्ठानम्। प्राणोपघातकं कठोरसत्यं सत्यरुपेण न मन्यते। सत्येन सह मङ्गलस्य सम्पर्कं भवितव्यम्। कल्यानस्पर्शरहितसत्याचरणम् अस्माकं जीवने मूल्यहीनम्। तदर्थं प्राचीनसमाजतात्त्विकमनुना उक्तम्-

**"सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्।**

**प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः।।"** (मनुसंहिता- 4/138)

अर्थात् सत्यं वक्तव्यं प्रियं वक्तव्यं यत् सत्यमप्रियं तत् न वक्तव्यम्, अपि च यत् प्रियं किन्तु असत्यं तद् अपि न वक्तव्यम्। सत्यम् अर्थात् यथाभूतार्थयुक्तं वाक्यम् मननं च। यद् रुपं दृष्टम् अनुमितं श्रूतं तद्-रूपं वाक्यं मननं च अर्थात् कथनं चिन्तनं च। यद् विषयं प्रमितं तथा चित्तवाक्यं च तदनुरुपं प्रवृत्तेः तत्सत्यसाधनम्। यत् परपीडा भवति तद् रूपं सत्यं वक्तव्यम् चिन्तनीयं भवितुं नार्हति। यथा अपरस्य यथार्थदोषकीर्तनं कृत्वा अपरं पीडयति अथवा असत्यमतावलम्बिनः नाशप्राप्तः भवेत् इत्याकारं चिन्तनम्। निजज्ञानसंक्रान्ति हेतुना अन्यान् वाक्यम् उक्ता तद् वाक्यं यदि वञ्चकं वा भ्रान्तम् अथवा श्रोतुः निकसा अर्थशून्यं न भवति तर्हि तद् वाक्यं सत्यम्। परन्तु तद् वाक्यं सर्वोभूतोपघातकं न भूत्वा उपकारार्थं भवितव्यम्, यतः वाक्यम् अभिधीयमानं भूत्वा यदि भूतोपघातकं भवति तर्हि तत् सत्यरुपं पूण्यं न भूत्वा पापं भवति। तादृशपूण्यवत् प्रतीयमानः पूण्यसदृशवाक्येन् दुःखमयः तमः प्राप्तं भवति। तस्मात् कारणात् विचारपूर्वकं सर्भूतहितजनकं सत्यवाक्यं वक्तव्यम्- **"सत्यं यथार्थे वाङ्मनसे यथा दृष्टं यथानुमितं यथा श्रूतं तथा वाङ्मनसश्चेति। परत्र स्ववोधसंक्रान्तये वागुक्ता सा यदि न वञ्चिता भ्रान्ता वा प्रतिपत्तिवन्धा वा भवेदिति, एषा सर्वभूतोपकारार्थं प्रवृता न भूतोपघातय यदि चैवमप्यभिधीयमाना भूतोपघातपरैव स्यात् न सत्यं भवेत् पापमेव भवेत्। तेन पूण्याभ्यासेन पूण्यप्रतिरुपकेन कष्टं तमः प्राप्नायात्, तस्मात् परक्ष्य सर्वभूतहितं सत्यं ब्रूयात्।"** (योगसूत्रं व्यासभाष्यम्) परन्तु जाबालोपनिषदि एवं कथ्यते यत् चक्षुरादीनाम् अर्थात् चक्षुकर्णनासिकादिपञ्चज्ञानेन्द्रियेन यत् श्रूतं घ्रातं तदेव सत्यरुपेण मन्यते विद्वांसः तस्य विपरीतं न भवेत्। अस्मिन् संसारे सर्वं सत्यं यतः सर्वं ब्रह्मैव। ब्रह्मपरमार्थिकसत्यम्। ब्रह्म विना अस्मिन् संसारे किमपि सत्यं न भवति इति वैदिकानां मतम्-

**"चक्षुरादीन्द्रियैर्दृष्टं श्रूतं घ्रातं मुनीश्वरः।**

**सस्यैवोक्तिर्भवेत्सत्यं विप्रतत्रान्यथा भवेत्।।**

**सर्वं सत्यं परं ब्रह्म न चान्यदिति या मतिः।**

**तच्च सत्यं वरं प्रोक्तं वेदान्तज्ञानपारगैः।।"** (जाबालोपनिषद् -9,10 )

सत्यप्रसङ्गे सर्वदर्शनसंग्रहे जैनदर्शनालोचना समये माधवाचार्येण उक्तम् यत् प्रियं हितोकरं यथार्थवाक्यं तत् सत्यब्रतमुच्यते। यत् वाक्यं प्रियं हितंकरं न भवति तत् वाक्यं यथार्थभूत्वा अपि यथार्थः न भवति।

**"प्रियं पथ्यं वचस्तथ्यं सूनृतं ब्रतमुच्यते।**

**तत्तथ्यमपि नो तथ्यमप्रियं चाहितं च यत्।।"** (सर्वदर्शनसंग्रहः- जैनदर्शनम्)

तस्मात् कारणात् मुण्डकोपनिषदि अपि उक्तम्-

**"सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः।"** (मुण्डकोपनिषत्)

सत्यसाधनार्थं प्रथमे मौनव्रतमल्पभाषणाभ्यासाः कर्तव्याः। अधिकवाचने सति अधिकं मिथ्याभाषणं भवितुमर्हति। अपारमार्थिकं सत्यं त्यक्ता केवलं पारमार्थिकसत्यं चिन्तनीयम्।

**अस्तेयम्-** सत्येन सह अस्तेयम् अर्थात् अचौर्यमपि अनुठ्यितव्यम्। अचौर्यम् अर्थात् चौर्यपरित्यागम्। एतत् अचौर्यव्रते परद्रव्यग्रहणस्य प्रवृत्तिरपि परित्याक्तव्यम्। परद्रव्यस्य अशास्त्रपूर्वकं यत् स्वीकरणम् तत् स्तेयम्। अर्थात् परद्रव्यं स्वद्रव्यं मत्वा प्रचारप्रसारम् अथवा एतत् मम एतादृशम् अभिमानं स्तेयं चौर्यं वा। यत् अदत्तम् अथवा धर्मतः अप्राप्यं तादृशः द्रव्यग्रहणं स्तेयम्। तत् त्याक्ता चित्ते तादृशं निस्पृहाभावम् अस्तेयम्। तस्मात् कारणात् योगभाष्टकारेण उक्तम्-

**"स्तेयम् अशास्त्रपूर्वकं द्रव्यानां परतः स्वीकरणम्, तत् प्रतिषेधः पुनरस्पृहारुपमस्तेमिति।"** (योगभाष्यम्)

योगवार्तिककारेणापि उक्तम्- **"स्तेयम् परस्वापहरणं तदभावः अस्तेयम्।"** (योगवार्त्तिकम्)

विज्ञानभिक्षुना तस्मात् कारणात् उच्यते- **"प्रतिग्रहव्यार्वतनाय अशास्त्रपूर्वकमिति ।तेन चौर्येणापि स्वत्त्वं जायते इत्यवगम्यते। अथवा स्वीकरणं ममेति बुद्धिमात्रं भ्रमसाधारणमिति।"** यत् द्रव्यम् केनापि दानं न क्रियते तत् द्रव्यम् अग्रहणम् अस्तेयमुच्यते। वस्तुतः धनसम्पदः मनुष्यः बाह्यप्राणः तद् बाह्यप्राणरुपद्रव्यग्रहणं क्रियते चेत् व्यक्तिमेव हरणं भवति। तस्मात् कारणात् माधवाचार्येण उक्तम् –

**"अनादानमदत्तस्यास्तैयव्रतमुदीरितम्।**

**बाह्याः प्राणाः नृणामर्थो हरता तं हता हि ते।।"** (सर्वसंग्रहसंग्रहः - जैनदर्शनम्)

**ब्रह्मचर्यम्-** उपरि उक्त अहिंसा-सत्य-अस्तेयेन सह ब्रह्मचर्यब्रतमपि अवश्यपालनीयम्। ब्रह्मचर्यमिति शब्दस्यार्थः शुक्रधारणम्। शरीरे यदि शुक्रधातुः प्रतिष्ठतं भवति, विकृतं न भवति, स्खलीतं न भवति, विचलितं न भवति, स्थिरं भवति, धृतं भवति तर्हि बुद्धीन्द्रियेन सह मनवलमपि दृढं भवति। चित्तस्य प्रकाशशक्तिवृद्धिः भवति। रागद्वेषादि अन्तर्हितः भवति, कामक्रोधः दूरीभुतं भवति। अतः शुक्रधातुनाम् अविकृतम् अस्खलीतम् अविचलितं रक्षणार्थं रसपूर्वकं कामभावे वा स्त्रीलकस्य दर्शनं स्पर्शनादि परित्याक्तव्यम्। क्रीडा हास्यः परिहासः अपि वर्जनीयम्। तस्मात् कारणात् योगभाष्यकारेणोक्तम्- **"ब्रह्मचर्यं गुप्तेन्द्रियस्योपस्थस्य संयमः।"** (व्यासभाष्यम्) अत्र उपस्थस्य संयमः इत्युक्ते अपरमिन्द्रियं यत् उपस्थस्य संयमे वाधकं भवति तस्य संयममपि अवधातव्यम्। दक्षसंहितायां मैथुनस्य अष्ठविधत्वकल्पना कृत्वा तत् परित्यागे ब्रह्मचर्यब्रतः अनुष्ठातव्यः।

**" ब्रह्मचर्यं सदा रक्षेदष्टधालक्षणं पृथक्।**

**स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्।।**

**संकल्पः अध्यवसायश्च क्रिया निष्पत्तिरेव च।**

**एतत् मैथुनम् अष्टाङ्गं प्रवदन्ति मनीषिनः।।**

**वीपरितं ब्रह्मचर्यमेतदेवाष्टलक्षणम्।"** (दक्षसंहिता)

पुराणकारेणापि सर्वप्रकारकं मैथुनत्यागं ब्रह्मचर्यमुच्यते।

**"कर्मणा मनसा वाचा सर्वावस्थासु सर्वदा।**

**सर्वत्र मैथुनत्यागो ब्रह्मचर्यं प्रचक्षते।।"** (कुर्मपुराणम्- 11/18)

अर्थात् कायमनवाक्येन सर्वावस्थायां सर्वस्थाने सर्वसमये च मैथुनत्यागं ब्रह्मचर्यम्। सर्वदर्शनसंग्रहकारमाधवाचार्यस्य मते मन-वाक्यशरीरेण कृतः-कारित-अनुमतश्च भेदेन दिव्यविषयभोगश्च त्यागं, कृत-कारित-अनुमतश्च ओदारिकविषयभोगस्य त्यागम्। अनेन प्रकारेण ब्रह्मचर्यम् अष्टादशप्रकारेण विभाजितम्।

**"दिव्यौदरिककामानं कृतानुमतकारितैः।**

**मनवाक्कायतस्त्यागो ब्राह्माष्टादशधा मतम्।।"** (सर्वदरशनसंग्रहः- जैनमतम्)

ब्रह्मचर्यविषये जावालोपनिषदि उक्तम् स्त्रीणां केवलं शारीरिकसंस्पर्शपरिवर्जनेन ब्रह्मचर्यब्रतानुष्ठानं न सम्भवः अपि तु मानसिकभावे तत् परिवर्जनं कर्तव्यम्। अत्र प्रश्नः जायते। यत् विवाहितजनाः ब्रह्मचर्यब्रतपालनं कर्तुं सम्भवन्ति न वा? तदुत्तरे मुनिना उक्तम् ऋतौ अर्थात् सन्तानोत्पादनार्थं भार्यया सह संगमं कर्तुं शक्यते ब्रह्मचारी। ये जनाः ब्रह्मभावे भाविताः, यथा- **"सोऽयं ब्रह्म," "तत्तमसि**"इत्यादि उपनिषद् वाक्यं प्रमाणं कुर्वन्ति यत् वयं सर्वे परमात्मनः अंशभूतः।

**"कायेन वाचा मनसा स्त्रीणां परिवर्जनम्।**

**ऋतौ भार्यां तदा स्वस्य ब्रह्मचर्यं तदुच्यते।।**

**ब्रह्मभावे मनश्चारं ब्रह्मचर्यं परन्तपः।।"** (जावालोपनिषद्-13,14)

**अपरिग्रहः-** विषयस्य अर्जने दुःखम्, रक्षणे दुःखं, क्षयेऽपि दुःखम् अपि च संस्कारजनितदुःखं दुःखमेव विषयग्रहणे अवसम्भाविहिंसाजनितं दुःखम् । एतत् सर्वं दुःखं ज्ञात्वा दुःखमुमुखुः प्रथमतः विषयत्यागं करोति। ततः अग्रहणं करोति।केवलं प्राणधारणार्थमुपयुक्तद्रव्यं स्वीकरोति। तस्य प्रमाणं श्रूतिः- **"त्यागेनैकेनामतत्वमानशुः"**बहूणां द्रव्यानां स्वामी भूत्वा अपि तत् परार्थे दानं न कृते सति सार्थपरता, परदुःख्ये असहानुभूतिः उच्यते। योगिनः प्रथमे स्वविषयं परार्थे त्याक्ता प्राणयात्रानिर्वहणार्थम् अतिरिक्तद्रव्यं परिग्रहणं न कुर्वन्ति स्म। प्राणधारणं यदि न करोति तर्हि योगसिद्धिः अपि च दोषस्य सम्पूर्णः निवृत्तिः न भवति इति मत्वा प्राणधारणस्य उपयुक्तद्रव्यमात्रभोग्यं परिग्रहणं करोति। तस्मात् कारणात् योगभाष्यकारेणा

उक्तम्-**"विषयानामर्जणरक्षणक्षयसङ्गहिंसादोषदर्शनादस्वीकरणमपरिग्रहः।"** (व्यासभाष्यम्) सर्वदर्शनसंग्रहे माधवाचार्येण अस्मिन् विषये उक्तं यत् सर्वेषां वस्तूनाम् आक्षांसा त्यागः अपरिग्रहः। यतः आक्षांसा द्वारा असद्विषये चित्तबिभ्रमं जायते।

**"सर्वभावेषु मृच्छायास्त्यागः स्यादपरिग्रहः।**

**यदसत्स्वपि जायेत मूर्च्छया चित्रविप्लवः।।"** (सर्वदरशनसंग्रहः- जैनमतम्)

**उपसंहारः-** आधुनिकसमाजे योगाङ्गेषु यमस्य प्रयोजनियता अत्यन्तं गुरुत्वपूर्णम्। महर्षिपतञ्जलिप्रणीतः योगशास्त्रः न केवलं संस्कृतधर्मशास्त्रः ग्रन्थसर्वस्वः वा, अत्र विश्वब्रह्माण्डस्य समस्तपदार्थान् एकसूत्रे संयोगस्थापनं कृत्वा मानवजीवनस्य परमसाधनः तथा च आनन्दानुभूतिं प्रापयित्वा दुःखस्य ऐकान्तिकमात्मन्तिकं च निवारणं कारयति। तस्मात् कारणात् एव योगः केवलं भारतीयदर्शनस्य एकमङ्गरुपेण मोक्षप्राप्तेः उपायरुपेण च भारतवर्षेषु सीमावद्धः न भवति, अपि तु समग्रविश्वस्य प्रधानाङ्गं भूत्वा येगः आध्यात्मिकसाधनस्य पश्चादेव जीवनस्य विशेषतः मानवस्य शारीरिकः मानसिकः बौद्धिकः चारित्रिकः अर्थात् सर्वाङ्गीणविकासः साधयति अधुनिकसमाजे। महर्षिपतञ्जलिना अष्टाङ्गयोगस्य उपकारिता प्रसङ्गे उवाच – **"योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः।"** अर्थात् योगाङ्गानुष्ठानेन अशुद्धे क्षयान्तरं विवेकख्यातिपर्यन्तम् अर्थात् मोक्षात् पूर्वपर्यन्तं ज्ञानद्वीप्तिः भवति। वर्तमानकाले योगस्य प्रथमाङ्गः यमं विना केवलमासनस्य प्राणायामस्य च उपरि अधिकं गुरुत्वं दीयते। अयमपि अनस्वीकार्यं यत् केवलमासनेन प्राणायामेण च शारीरिकमानसिकसुस्थता वर्तते। परन्तु या सुस्थता तावत् पर्यन्तं दीर्घस्थायी न भवति यावत् पर्यन्तं यमस्य पालनं न भवति। वर्तमानकाले योगरुपेण केवलम् आसनप्राणायामयोः चर्चा क्रियते, तेन कारणेन अधुना महर्षिपतञ्जलिप्रणीतस्य योगस्य माहात्मता न वर्तते। अहिंसा सत्यम् अस्तेयं ब्रह्मचर्यम् अपरिग्रहः इत्येषां पञ्चविधानां यमाणां पालनं मानवस्य केवलम् आसनादि सिद्धेः सहायकरुपेण कार्यं न करोति अपि तु एते यमाः जीवानां परमकाम्यमोक्ष्यलाभस्य प्रधानाङ्गरुपेण स्वीकरणीयम्। अपि च आधुनिककाले मानवस्य स्वार्थपरता-हिंसा-लोभ-कामक्रोधादिमुक्तेः उपायः यमं विना असम्भवम्। तस्मात् कारणात् अष्टाङ्गयोगेषु यमस्य प्रयोजनीयता अनस्वीकार्यम्। यमस्य पालनं समस्तमानवानं कृते अत्यावश्यकमिति मे मतिः।

**उपयुक्तसहायकग्रन्थसूची-**


1.आरण्य.हरिहरानन्द, "पातञ्जलयोगदर्शनम्", कोलकाता, पश्चिमबङ्गराज्यपुस्तकपर्षद्,सन्-2015.

2.आचार्यः.श्रीकृष्णबल्लभः, "योगदर्शनम्", वाराणसी, चौखाम्बा विद्याभवन् , सन्-2001.

3.पाल.विपद्भञ्जनः, "वेदान्तसारः," कोलकाता, संस्कृतपुस्तकभण्डारः, सन्-2016.

4.साधुखाँ. सञ्जित्कुमार, "सर्वदर्शनसंग्रहे वौद्धदर्शन ओ जैनदर्शन," कोलकाता, सदेश,सन्-2016.

5.विद्यालंकार.सुभाषः, "हठयोगत्रयी", दिल्ली, प्रतिभा प्रकाशन्, सन्-2011.

6.श्रावस्ती.ब्रह्ममित्र, "पातञ्जलयोगदर्शन एक अध्ययन," दिल्ली, इन्दुप्रकाशम्।